# Prajnaparamita Sutra or Prajnaparamitahridayam

# પ્રજ્ઞાપારમિતાસૂત્ર અથવા પ્રજ્ઞાપારમિતાહૃદયમ્

## Document Information

Text title : Prajnaparamita Hridayam

File name : prajnApAramitAhRRidayam.itx

Category : devii, devI, buddha, hRidaya

Location : doc_devii

Transliterated by : Durga Sharma

Proofread by : Durga Sharma

Latest update : June 23, 2026

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 23, 2026

*sanskritdocuments.org*

Prajnaparamita Sutra or Prajnaparamitahridayam

# પ્રજ્ઞાપારમિતાસૂત્ર અથવા પ્રજ્ઞાપારમિતાહૃદયમ્

ૐ નમો ભગવત્યૈ આર્યપ્રજ્ઞાપારમિતાયૈ ॥

આર્યાવલોકિતેશ્વરો બોધિસત્ત્વો ગમ્ભીરાં પ્રજ્ઞાપારમિતાચાર્યાં ચરમાણો
વ્યવલોકયતિ સ્મ પઞ્ચસ્કન્ધાન્ તાંશ્ચ સ્વભાવશૂન્યાન્ પશ્યતિ સ્મ ॥

ઇહ શારિપુત્ર રૂપં શૂન્યતા શૂન્યતૈવ રૂપમ્ ।
રૂપાન્ન પૃથક્ શૂન્યતા શૂનતાયાઃ ન પૃથગ્રૂપમ્ ।
યદ્રૂપં સા શૂન્યતા યા શૂન્યતા તદ્રૂપમ્ ।
એવમેવ વેદનાસંજ્ઞાસંસ્કારવિજ્ઞાનમ્ ॥

ઇહ શારિપુત્ર સર્વધર્માઃ શૂન્યતાલક્ષણાઃ ।
અનુત્પન્ના અનિરુદ્ધાઃ અમલા અવિમલાઃ ।
અનૂના અપરિપૂર્ણાઃ ॥

તસ્માચ્છારિપુત્ર શૂન્યતાયાં ન રૂપં ન વેદના ન સંજ્ઞા
ન સંસ્કારાઃ ન વિજ્ઞાનમ્ ।
ન ચક્ષુઃશ્રોત્રઘ્રાણજિહ્વાકાયમનાંસિ ।
ન રૂપશબ્દગન્ધરસસ્પ્રષ્ટવ્યધર્માઃ ।
ન ચક્ષુર્ધાતુર્યાવન્ન મનોવિજ્ઞાનધાતુઃ ।
ન અવિદ્યા ન અવિદ્યાક્ષયો યાવન્ન જરામરણં ન જરામરણક્ષયઃ ।
ન દુઃખસમુદયનિરોધમાર્ગાઃ ।
ન જ્ઞાનં ન પ્રાપ્તિર્ન અપ્રાપ્તિઃ ॥

તસ્માચ્છારિપુત્ર અપ્રાપ્તિત્વાદ્બોધિસત્ત્વસ્ય
પ્રજ્ઞાપારમિતામાશ્રિત્ય વિહરત્યચિત્તાવરણઃ ।
ચિત્તાવરણનાસ્તિત્વાદત્રસ્તો વિપર્યાસાતિક્રાન્તો
નિષ્ઠનિર્વાણપ્રાપ્તઃ ॥

ત્ર્યધ્વવ્યવસ્થિતાઃ સર્વબુદ્ધાઃ પ્રજ્ઞાપારમિતામાશ્રિત્ય

અનુત્તરાં સમ્યક્સમ્બોધિમભિસમ્બુદ્ધાઃ ॥

તસ્માજ્જ્ઞાતવ્યં પ્રજ્ઞાપારમિતા મહામન્ત્રઃ ।
મહાવિદ્યામન્ત્રોઽનુત્તરમન્ત્રઃ સમસમમન્ત્રઃ ।
સર્વદુઃખપ્રશમનઃ સત્યમમિથ્યાત્વાત્ ॥

પ્રજ્ઞાપારમિતાયામુક્તો મન્ત્રઃ તદ્યથા -
ગતે ગતે પારગતે પારસઙ્ગતે બોધિ સ્વાહા ॥

ઇતિ પ્રજ્ઞાપારમિતાહૃદયં સમાપ્તમ્ ॥

Notes:-
This mantras are secret mantras of Mahayana BuddhisM
and Samayachara Tantra of Kamakhya .
Prajnaparamita is also known as Prajna Lekhini.
She is one of the forms of Lekhini.

Encoded and proofread by Durga Sharma

*Prajnaparamita Sutra or Prajnaparamitahridayam*
pdf was typeset on June 23, 2026

Please send corrections to *sanskrit@cheerful.com*